ॐ

Śrī Sāī Rām

# ॥ श्रीरुद्रप्रश्नः ॥

## śrīrudrapraśnaḥ

### *Anuvakam 1*

| | Learning[1] | Continous chanting[2] |
|---|---|---|
| 1 | ॐ नमो भगवते॑ रु॒द्राय<br>om namo bhagavate̍ rudr̠āya | ॐ नमो भगवते॑ रु॒द्राय॥<br>om namo bhagavate̍ rudr̠āya |
| 2 | ॐ नम॑स्ते रुद्र म॒न्यव॑<br>om nama̍ste rudra m̱anyava̍<br>उ॒तोत॒ इष॑वे॒ नम॑ः<br>u̱tota̱ iṣa̍ve̱ nama̍ḥ | ॐ नम॑स्ते रुद्र म॒न्यव॑ उ॒तोत॒ इष॑वे॒ नम॑ः।<br>om nama̍ste rudra m̱anyava̍ u̱tota̱ iṣa̍ve̱ nama̍ḥ |
| 3 | नम॑स्ते अस्तु॒ धन्व॑ने<br>nama̍ste astu̱ dhanva̍ne<br>बा॒हुभ्या॑मु॒त ते॒ नम॑ः<br>bā̱hubhyā̍mu̱ta te̱ nama̍ḥ | नम॑स्ते अस्तु॒ धन्व॑ने बा॒हुभ्या॑मु॒त ते॒ नम॑ः।<br>nama̍ste astu̱ dhanva̍ne bā̱hubhyā̍mu̱ta te̱ nama̍ḥ |
| 4 | या त॒ इषु॑ः शि॒वत॑मा<br>yā ta̱ iṣu̍ḥ ś̱ivata̍mā<br>शि॒वं ब॒भूव॑ ते॒ धनु॑ः<br>ś̱ivaṁ ba̱bhūva̍ te̱ dhanu̍ḥ | या त॒ इषु॑ः शि॒वत॑मा शि॒वं ब॒भूव॑ ते॒ धनु॑ः।<br>yā ta̱ iṣu̍ḥ ś̱ivata̍mā ś̱ivaṁ ba̱bhūva̍ te̱ dhanu̍ḥ |

[1] *To follow the learning column, where each śloka is divided into many parts and each part is chanted twice, please refer to Sri-Rudram-Learning-Method-1-Anuvakam-1.mp3.*

[2] *To follow continuous chanting column, where the śloka is chanted without interruption and repeated once, please refer to Sri-Rudram-Learning-Method-2-Anuvakam-1.mp3 or Sri-Rudram-Learning-Method-3-Anuvakam-1.mp3 where no repetition accrues.*

| | Learning[1] | Continous chanting[2] |
|---|---|---|
| 5 | शि॒वा श॑र॒व्या॑ या तव॒<br>śi̱vā śa̍ra̱vyā̍ yā tava̱<br>तया॑ नो रुद्र मृडय<br>tayā̍ no rudra mṛḍaya | शि॒वा श॑र॒व्या॑ या तव॒ तया॑ नो रुद्र मृडय।<br>śi̱vā śa̍ra̱vyā̍ yā tava̱ tayā̍ no rudra mṛḍaya |
| 6 | या ते॑ रुद्र शि॒वा त॒नूः<br>yā te̍ rudra śi̱vā ta̱nūḥ<br>अघो॒राऽपा॑पकाशिनी।<br>agho̱rā'pā̍pakāśinī | या ते॑ रुद्र शि॒वा त॒नूरघो॒राऽपा॑पकाशिनी।<br>yā te̍ rudra śi̱vā ta̱nūragho̱rā'pā̍pakāśinī[3] |
| 7 | तया॑ नस्त॒नुवा॒ शन्त॑मया॒<br>tayā̍ nasta̱nuvā̱ śanta̍mayā̱<br>गिरि॑शंता॒भिचा॑कशीहि<br>giri̍śaṁtā̱bhicā̍kaśīhi | तया॑ नस्त॒नुवा॒ शन्त॑मया॒ गिरि॑शंता॒भिचा॑कशीहि।<br>tayā̍ nasta̱nuvā̱ śanta̍mayā̱ giri̍śaṁtā̱bhicā̍kaśīhi |
| 8 | यामिषुं॑ गिरिशंत॒ हस्ते॒<br>yāmiṣuṁ̍ giriśaṁta̱ haste̱<br>बिभ॒र्ष्यस्त॑वे<br>bibha̱rṣyasta̍ve | यामिषुं॑ गिरिशंत॒ हस्ते॒ बिभ॒र्ष्यस्त॑वे।<br>yāmiṣuṁ̍ giriśaṁta̱ haste̱ bibha̱rṣyasta̍ve |
| 9 | शि॒वां गि॑रित्र॒ तां कु॑रु॒<br>śi̱vāṁ gi̍ritra̱ tāṁ ku̍ru̱<br>मा हिग्ं॑सी॒ः पुरु॑षं॒ जग॑त्<br>mā higṁ̍sī̱ḥ puru̍ṣa̱ṁ jaga̍t | शि॒वां गि॑रित्र॒ तां कु॑रु॒ मा हिग्ं॑सी॒ः पुरु॑षं॒ जग॑त्।<br>śi̱vāṁ gi̍ritra̱ tāṁ ku̍ru̱ mā higṁ̍sī̱ḥ puru̍ṣa̱ṁ jaga̍t |
| 10 | शि॒वेन॒ वच॑सा त्वा॒<br>śi̱vena̱ vaca̍sā tvā̱<br>गिरि॒शाच्छा॑वदामसि<br>giri̱śācchā̍vadāmasi | शि॒वेन॒ वच॑सा त्वा॒ गिरि॒शाच्छा॑वदामसि।<br>śi̱vena̱ vaca̍sā tvā̱ giri̱śācchā̍vadāmasi |

[3] *Sandhi rule: ḥ which is not preceded by a-dvaya (a or ā) changes to r before soft consonants and vowels (tanūḥ aghorā ›* तनूरघोरा *tanūraghorā; hareḥ nāma ›* हरेर्नाम *harernāma; agniḥ jyotiḥ ahaḥ ›* अग्निर्ज्योतिरहः *agnirjyotirahaḥ).*

| | Learning[1] | Continous chanting[2] |
|---|---|---|
| 11 | यथा॑ नः॒ सर्व॒मिज्जग॑त्<br>yathā̍ na̱ḥ sarva̱mijjaga̍t<br>अय॒क्ष्मग्ं सु॒मना॒ अस॑त्<br>aya̱kṣmagṁ su̱manā̱ asa̍t | यथा॑ नः॒ सर्व॒मिज्जग॑दय॒क्ष्मग्ं सु॒मना॒ अस॑त्।<br>yathā̍ na̱ḥ sarva̱mijjaga̍daya̱kṣmagṁ[4] su̱manā̱ asa̍t |
| 12 | अध्य॑वोचदधिव॒क्ता<br>adhya̍vocadadhiva̱ktā<br>प्र॑थ॒मो दैव्यो॑ भि॒षक्<br>pra̍tha̱mo daivyo̍ bhi̱ṣak | अध्य॑वोचदधिव॒क्ता प्र॑थ॒मो दैव्यो॑ भि॒षक्।<br>adhya̍vocadadhiva̱ktā pra̍tha̱mo daivyo̍ bhi̱ṣak |
| 13 | अही॑ग्ंश्च॒ सर्वा᳚न्<br>ahī̍gśca̱ sarvā̎n<br>ज॒म्भय॒न्त्सर्वा᳚श्च यातुधा॒न्य॑ः<br>ja̱mbhaya̱ntsarvā̎śca yātudhā̱nya̍ḥ | अही॑ग्ंश्च॒ सर्वा᳚ञ्ज॒म्भय॒न्त्सर्वा᳚श्च यातुधा॒न्य॑ः।<br>ahī̍gśca̱ sarvā̎ñja̱mbhaya̱ntsarvā̎śca[5] yātudhā̱nya̍ḥ |
| 14 | अ॒सौ यस्ता॒म्रो<br>a̱sau yasta̱mro<br>अ॑रु॒ण उ॒त ब॒भ्रुः सु॑म॒ङ्गल॑ः<br>a̍ru̱ṇa u̱ta ba̱bhruḥ su̍ma̱ṅgala̍ḥ | अ॒सौ यस्ता॒म्रो अ॑रु॒ण उ॒त ब॒भ्रुः सु॑म॒ङ्गल॑ः।<br>a̱sau yasta̱mro a̍ru̱ṇa u̱ta ba̱bhruḥ su̍ma̱ṅgala̍ḥ |
| 15 | ये चे॒माग्ं रु॒द्रा<br>ye ce̱māgṁ ru̱drā<br>अ॒भितो॑ दि॒क्षुः<br>a̱bhito̍ di̱kṣuḥ<br>श्रि॒ताः स॑हस्र॒शोऽवै॑षा॒ग्ं<br>śri̱tāḥ sa̍hasra̱śo'vai̍ṣā̱gṁ<br>हेड॑ ईमहे<br>heḍa̍ īmahe | ये चे॒माग्ं रु॒द्रा अ॒भितो॑ दि॒क्षु श्रि॒ताः स॑हस्र॒शोऽवै॑षा॒ग्ं हेड॑ ईमहे।<br>ye ce̱māgṁ ru̱drā a̱bhito̍ di̱kṣu śri̱tāḥ sa̍hasra̱śo'vai̍ṣā̱gṁ heḍa̍ īmahe |

[4] *Sandhi rule: »hard« consonants change to »soft« consonants, before soft consonants and vowels (sarvamijjagat ayakṣmagṁ ›* सर्वमिज्जगदयक्ष्मगं *sarvamijjagadayakṣmagṁ; śrīmat bhāgavatam ›* श्रीमद्भागवतम् *śrīmadbhāgavatam).*

[5] *Sandhi rule: final n changes to ñ before j, jh, ñ, ś (sarvān jambhayantsarvāśca ›* सर्वाञ्जम्भयन्त्सर्वाश्च *sarvāñjambhayantsarvāśca; spṛśan jighran ›* स्पृशञ्जिघ्रन् *spṛśañjighran).*

| | Learning[1] | Continous chanting[2] |
|---|---|---|
| 16 | अ॒सौ यो॑ऽव॒सर्प॑ति॒<br>a̱sau yo̍'va̱sarpa̍ti̱<br>नील॑ग्रीवो॒ विलो॑हितः<br>nīla̍grīvo̱ vilo̍hitaḥ | अ॒सौ यो॑ऽव॒सर्प॑ति॒ नील॑ग्रीवो॒ विलो॑हितः।<br>a̱sau yo̍'va̱sarpa̍ti̱ nīla̍grīvo̱ vilo̍hitaḥ |
| 17 | उ॒तैनं॑ गो॒पा अ॑दृश॒न्न्<br>u̱taina̍ṁ go̱pā a̍dṛśa̱nn<br>अदृ॑शन्नुदहा॒र्यः॑<br>adṛ̍śannudahā̱rya̍ḥ | उ॒तैनं॑ गो॒पा अ॑दृश॒न्नदृ॑शन्नुदहा॒र्यः॑।<br>u̱taina̍ṁ go̱pā a̍dṛśa̱nnadṛ̍śannudahā̱rya̍ḥ |
| 18 | उ॒तैनं॒ विश्वा॑ भू॒तानि॒<br>u̱tainaṁ̱ viśvā̍ bhū̱tāni̱<br>स दृ॒ष्टो मृ॑डयाति नः<br>sa dṛ̱ṣṭo mṛ̍ḍayāti naḥ | उ॒तैनं॒ विश्वा॑ भू॒तानि॒ स दृ॒ष्टो मृ॑डयाति नः।<br>u̱tainaṁ̱ viśvā̍ bhū̱tāni̱ sa dṛ̱ṣṭo mṛ̍ḍayāti naḥ |
| 19 | नमो॑ अस्तु॒ नील॑ग्रीवाय<br>namo̍ astu̱ nīla̍grīvāya<br>सहस्रा॒क्षाय॑ मी॒ढुषे॓<br>sahasrā̱kṣāya̍ mī̱ḍhuṣe̎ | नमो॑ अस्तु॒ नील॑ग्रीवाय सहस्रा॒क्षाय॑ मी॒ढुषे॓।<br>namo̍ astu̱ nīla̍grīvāya sahasrā̱kṣāya̍ mī̱ḍhuṣe̎ |
| 20 | अथो॒ ये अ॑स्य॒<br>atho̱ ye a̍sya̱<br>सत्वा॑नो॒ऽहं<br>satvā̍no̱'haṁ<br>तेभ्यो॑ऽकर॒न्नमः॑<br>tebhyo̍'kara̱nnama̍ḥ | अथो॒ ये अ॑स्य॒ सत्वा॑नो॒ऽहं तेभ्यो॑ऽकर॒न्नमः॑।<br>atho̱ ye a̍sya̱ satvā̍no̱'haṁ tebhyo̍'kara̱nnama̍ḥ |
| 21 | प्रमु॑ञ्च॒ धन्व॑न॒स्त्वम्<br>pramu̍ñca̱ dhanva̍na̱stvam<br>उ॒भयो॒रार्त्नि॓ यो॒र्ज्याम्<br>u̱bhayo̱rārtni̎ yo̱rjyām | प्रमु॑ञ्च॒ धन्व॑न॒स्त्वमु॒भयो॒रार्त्नि॓ यो॒र्ज्याम्।<br>pramu̍ñca̱ dhanva̍na̱stvamu̱bhayo̱rārtni̎ yo̱rjyām |

| | Learning[1] | Continous chanting[2] |
|---|---|---|
| 22 | याश्च॑ ते॒ हस्त॒ इष॑वः॒<br>yāśca̍ te̱ hasta̱ iṣa̍vaḥ̱<br>परा॒ ता भ॑गवो वप<br>parā̱ tā bha̍gavo vapa | याश्च॑ ते॒ हस्त॒ इष॑वः॒ परा॒ ता भ॑गवो वप।<br>yāśca̍ te̱ hasta̱ iṣa̍vaḥ̱ parā̱ tā bha̍gavo vapa |
| 23 | अ॒व॒तत्य॒ धनु॒स्त्वग्ं<br>a̱va̱tatya̱ dhanu̱stvagṁ<br>सह॑स्राक्ष॒ शते॑षुधे<br>saha̍srākṣa̱ śate̍ṣudhe | अ॒व॒तत्य॒ धनु॒स्त्वग्ं सह॑स्राक्ष॒ शते॑षुधे।<br>a̱va̱tatya̱ dhanu̱stvagṁ saha̍srākṣa̱ śate̍ṣudhe |
| 24 | नि॒शीर्य॑ श॒ल्याना॒ं मुखा॑<br>ni̱śīrya̍ śa̱lyānā̱ṁ mukhā̍<br>शि॒वो न॑ः सु॒मना॑ भव<br>śi̱vo na̍ḥ su̱manā̍ bhava | नि॒शीर्य॑ श॒ल्याना॒ं मुखा॑ शि॒वो न॑ः सु॒मना॑ भव।<br>ni̱śīrya̍ śa̱lyānā̱ṁ mukhā̍ śi̱vo na̍ḥ su̱manā̍ bhava |
| 25 | विज्यं॒ धनु॑ः कप॒र्दिनो॒<br>vijya̱ṁ dhanu̍ḥ kapa̱rdino̱<br>विश॑ल्यो॒ बाण॑वाग्ं उ॒त<br>viśa̍lyo̱ bāṇa̍vāgṁ u̱ta | विज्यं॒ धनु॑ः कप॒र्दिनो॒ विश॑ल्यो॒ बाण॑वाग्ं उ॒त।<br>vijya̱ṁ dhanu̍ḥ kapa̱rdino̱ viśa̍lyo̱ bāṇa̍vāgṁ u̱ta |
| 26 | अने॑शन्न॒स्येष॑व<br>ane̍śanna̱syeṣa̍va<br>आ॒भुर॑स्य निषं॒गथि॑ः<br>ā̱bhura̍sya niṣa̱ṁgathi̍ḥ | अने॑शन्न॒स्येष॑व आ॒भुर॑स्य निषं॒गथि॑ः।<br>ane̍śanna̱syeṣa̍va ā̱bhura̍sya niṣa̱ṁgathi̍ḥ |
| 27 | या ते॑ हे॒तिर्मी॑ढुष्टम॒<br>yā te̍ he̱tirmī̍ḍhuṣṭama̱<br>हस्ते॑ ब॒भूव॑ ते॒ धनु॑ः<br>haste̍ ba̱bhūva̍ te̱ dhanu̍ḥ | या ते॑ हे॒तिर्मी॑ढुष्टम॒ हस्ते॑ ब॒भूव॑ ते॒ धनु॑ः।<br>yā te̍ he̱tirmī̍ḍhuṣṭama̱ haste̍ ba̱bhūva̍ te̱ dhanu̍ḥ |

| | Learning[1] | Continous chanting[2] |
|---|---|---|
| 28 | तया॒ऽस्मान् वि॒श्वत॒<br>tayā̱'smān vi̱śvata̱[6]<br>त्वम॑य॒क्ष्मया॒ परि॑ब्भुज<br>tvama̍ya̱kṣmayā̱ pari̍bbhuja | तया॒ऽस्मान् वि॒श्वत॒स्त्वम॑य॒क्ष्मया॒ परि॑ब्भुज।<br>tayā̱'smān vi̱śvata̱stvama̍ya̱kṣmayā̱ pari̍bbhuja |
| 29 | नम॑स्ते अ॒स्त्वायु॑धा॒या<br>nama̍ste a̱stvāyu̍dhā̱yā<br>अना॑तताय धृ॒ष्णवे᳚<br>anā̍tatāya dhṛ̱ṣṇave̎ | नम॑स्ते अ॒स्त्वायु॑धा॒याना॑तताय धृ॒ष्णवे᳚।<br>nama̍ste a̱stvāyu̍dhā̱yānā̍tatāya[7] dhṛ̱ṣṇave̎ |
| 30 | उ॒भाभ्या॑मु॒त ते॒ नमो॑<br>u̱bhābhyā̍mu̱ta te̱ namo̍<br>बा॒हुभ्या॒म्॒ तव॒ धन्व॑ने<br>bā̱hubhyā̱m̱ tava̱ dhanva̍ne | उ॒भाभ्या॑मु॒त ते॒ नमो॑ बा॒हुभ्या॒म्॒ तव॒ धन्व॑ने।<br>u̱bhābhyā̍mu̱ta te̱ namo̍ bā̱hubhyā̱m̱ tava̱ dhanva̍ne |
| 31 | परि॑ ते॒ धन्व॑नो हे॒तिः<br>pari̍ te̱ dhanva̍no he̱tiḥ<br>अ॒स्मान्वृ॑णक्तु वि॒श्वतः॑<br>a̱smānvṛ̍ṇaktu vi̱śvata̍ḥ | परि॑ ते॒ धन्व॑नो हे॒तिर॒स्मान्वृ॑णक्तु वि॒श्वतः॑।<br>pari̍ te̱ dhanva̍no he̱tira̱smānvṛ̍ṇaktu[8] vi̱śvata̍ḥ |
| 32 | अथो॒ य इ॑षु॒धिः<br>atho̱ ya i̍ṣu̱dhiḥ<br>तवा॒रे अ॒स्मन्निधे॑हि॒ तम्<br>tavā̱re a̱smannidhe̍hi̱ tam | अथो॒ य इ॑षु॒धिस्तवा॒रे अ॒स्मन्निधे॑हि॒ तम्॥<br>atho̱ ya i̍ṣu̱dhistavā̱re[9] a̱smannidhe̍hi̱ tam |

[6] *The other source states viśvataḥ* विश्वतः*, however this text adopts viśvata due to the audio source.*

[7] *Sandhi rule: two vowels of the same class combine into a long one: a + a › ā; a + ā › ā; ā + a › ā; ā + ā › ā (astvāyudhāyā anātatāya ›* अस्त्वायुधायानातताय *astvāyudhāyānātatāya; nitya ānanda ›* नित्यानन्द *nityānanda).*

[8] *Sandhi rule: ḥ which is not preceded by a-dvaya (a or ā) changes to r before soft consonants and vowels (hetiḥ asmānvṛṇaktu ›* हेतिरस्मान्वृणक्तु *hetirasmānvṛṇaktu; hareḥ nāma ›* हरेर्नाम *harernāma; agniḥ jyotiḥ ahaḥ ›* अग्निर्ज्योतिरहः *agnirjyotirahaḥ).*

[9] *Sandhi rule: ḥ changes to ś before c/ch, to ṣ before ṭ ṭh, to s before t/th (iṣudhiḥ tavāre ›* इषुधिस्तवारे *iṣudhistavāre; namaḥ te ›* नमस्ते *namaste).*

| | Learning[1] | Continous chanting[2] |
|---|---|---|
| 33 | नम॑स्ते अस्तु भगवन्<br>nama̍ste astu bhagavan<br>विश्वेश्व॒राय॑ महादे॒वाय॑<br>viśveśva̱rāya̍ mahāde̱vāya̍<br>त्र्यम्ब॒काय॑ त्रिपुरान्त॒काय॑<br>tryamba̱kāya̍ tripurānta̱kāya̍<br>त्रिकाग्निका॒लाय॑ कालाग्निरु॒द्राय॑<br>trikāgnikā̱lāya̍ kālāgniru̱drāya̍<br>नीलक॒ण्ठाय॑ मृत्युञ्ज॒याय॑<br>nīlaka̱ṇṭhāya̍ mṛtyuñja̱yāya̍<br>सर्वेश्व॒राय॑ सदाशि॒वाय॑<br>sarveśva̱rāya̍ sadāśi̱vāya̍<br>श्रीमन्महादे॒वाय॒ नम॑ः<br>śrīmanmahāde̱vāya̱ nama̍ḥ | नम॑स्ते अस्तु भगवन् विश्वेश्व॒राय॑ महादे॒वाय॑ त्र्यम्ब॒काय॑ त्रिपुरान्त॒काय॑ त्रिकाग्निका॒लाय॑ कालाग्निरु॒द्राय॑ नीलक॒ण्ठाय॑ मृत्युञ्ज॒याय॑ सर्वेश्व॒राय॑ सदाशि॒वाय॑ श्रीमन्महादे॒वाय॒ नम॑ः ॥<br>nama̍ste astu bhagavan viśveśva̱rāya̍ mahāde̱vāya̍ tryamba̱kāya̍ tripurānta̱kāya̍ trikāgnikā̱lāya̍ kālāgniru̱drāya̍ nīlaka̱ṇṭhāya̍ mṛtyuñja̱yāya̍ sarveśva̱rāya̍ sadāśi̱vāya̍ śrīmanmahāde̱vāya̱ nama̍ḥ |